# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College under University of Calcutta)

**THIRD YEAR**

**B.A./B.SC. FIFTH SEMESTER (July – December) 2014**

**Mid-Semester Examination, September 2014**

Date : 15/09/2014 **SANSKRIT (Honours)**

Time : 2 pm – 4 pm Paper : V Full Marks : 50

1. सायणाचार्यदिशा संस्कृतेन व्याख्यायतामन्यतरो मन्त्रः। [1×6]

   a) अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
      स देवाँ एह वक्षति।

   b) अग्निना रयिमश्नवत्
      पोषमेव दिवेदिवे।
      यशसं वीरवत्तमम्।।

2. अधस्तात् प्रदत्तयोरेकस्य मन्त्रस्य पदपाठः प्रदेयः। [1×5]

   a) अग्निना रयिमश्नवत्
      पोषमेव दिवेदिवे।
      यशसं वीरवत्तमम्।।

   b) अग्ने यं यज्ञमध्वरं
      विश्वतः परिभूरसि।
      स इद् देवेषु गच्छति।।

3. क) 'अग्निमीळे' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम् – व्याख्यायताम्। [1×4]

   **अथवा**

   ख) को नाम विनियोगः ? कति तस्य प्रकाराः ? समासेन तेषां परिचयः प्रदेयः। [1+3]

   **अथवा**

   ग) यत्किमपि पदद्वयमवलम्ब्य वैयाकरणटिप्पणीद्वयं रचनीयम्। [2+2]
      ईळे, पूर्वेभिः, वक्षति।

4. मनुसंहितायाः सप्तमाध्यायमवलम्ब्य दण्डे मनुमुनिमतं प्रकाशनीयम्। [10]

   **अथवा**

   मनुमुनिमतानुसारं कामजव्यसनविषयको निबन्धो विरचनीयः। [10]

5. यत्किमप्येकं पद्यममरगिरा व्याख्यायताम्। [1×8]

   a) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
      महती देवता ह्येषा नररूपेण तिष्ठति।।

   b) यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः।
      शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः।।

6. अन्यतरस्य पद्यस्य वङ्गानुवादः कार्यः। [1×5]

a) यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः।।

b) तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम्।।

7. a) 'चतस्र एव विद्या इति कौटिल्यः' – इति मतम् अर्थशास्त्रकारशैल्या स्थापनीयम्। त्रयीतरविद्यानां स्वरूपं चोपस्थापनीयम्। [3+9]

**अथवा**

b) ''एष त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः।'' – व्याख्यायताम्। [12]

——————— × ———————